B.A./5th Sem (H)/SNSK/23(CBCS)

# 2023

## 5th Semester Examination

## SANSKRIT (Honours)

### Paper : C 11-T

### [Vedic Literature]

### [CBCS]

Full Marks : 60 Time : Three Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

1. अधोलिखितेषु यथेच्छं **दश** प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेया : 2×10=20

(क) 'कविक्रतुः' कः ? स कैः सह कुत्रागच्छति ?

(ख) अग्निः कीदृशं यज्ञं विश्वतः व्याप्य निष्ठति ? स यज्ञः कुत्र गच्छति ?

(ग) कस्मिन् वेदे शिवसंकल्पसूक्तं वर्तते ? तत्र कस्य स्तुतिर्विहिता ?

(घ) देवेषु एकोऽधिदेवः कः ? तस्य विशेषणद्वयं प्रदीयताम्।

(ङ) 'न मा मिमेथ न जिहीळ एषा' — अत्र कः वक्ता ? 'जिहीळ' इति पदस्य कोऽर्थः ?

P.T.O.

(च) उषासूक्तस्य (ऋ.3.61) कः ऋषिः ? कुत्र चास्य सूक्तस्य विनियोगः क्रियते ?

(छ) विशेषविनियोगः कतिधा विभक्तः ? तेषां कानि नामानि ?

(ज) पृथिव्यादौ कुत्रासीत् ? तस्याः हृदयं कुत्र वर्तते ?

(झ) विश्वंभरा, वसुधानी, निवेशिनी, हिरण्यवक्षा-इत्येषां पदानां अर्थं लिखत।

(ञ) 'रथनाभौ' अराः इव मनसि के वर्तन्ते ?

(ट) अनुव्रतः पितुः पुत्रो माता भवतु संमनाः —

कुत्रोऽयं मन्त्रो वर्तते ? मन्त्रार्थः कः ?

(ठ) 'सम्यञ्चः', 'सव्रता' इति पदयोः कोऽर्थः ?

(ड) 'मुण्डकोपनिषद्' सम्बन्धो वेदः कः ? अत्र कति खण्डाः सन्ति ?

(ढ) देवानां प्रथमः कः आसीत् ? स कं किमुपदिष्टवान्।

(ण) 'वदतु', 'अश्नवत्' इत्यनयोः पदयोर्मध्ये एकस्य पदसाधनं क्रियताम्।

2. अधोलिखितेषु यथेच्छं **चत्वारः** प्रश्नाः समाधेयाः (येषु एकस्योत्तरं संस्कृतभाषया देवनागरीलिप्या च दातव्यम्) : 5×4=20

(क) अग्निना रयिमश्नवत् पोषमेव दिवेदिवे।

यशसं वीरवत्तमम्॥

— इत्यस्य मन्त्रस्य ऋषि-छन्दोदेवता-निर्देशपुरःसरं सायणभाष्यमाश्रित्य व्याख्या कार्या।

(ख) ऋषि-छन्दो-देवतानिर्देशपुरःसरं सायणभाष्यमाश्रित्य व्याख्यायताम् —

य आत्मदा बलदा यस्य विश्व।

उपासते प्रशिषं यस्य देवाः।

यस्य छायामृतं यस्य मृत्युः

कस्मै देवाय हविषा विधेम॥

(ग) 'तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः भाष्यवचनमिदं स्फुटीक्रियताम्।

(घ) अधः प्रदत्तस्य मन्त्रस्य पदपाठं कृत्वा कस्यापि पदद्वयस्य स्वरसाधनं कुरुत —

उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्।

नमो भरन्त एमसि॥

(ङ) अधः प्रदत्तस्य मन्त्रस्य व्याख्या कार्या —

यज्जाग्रतो दूरमुदैति दैवं तदु सुप्तस्य तथैवैति।

दूरंगमं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु॥

(च) सत्यमेव जयति नानृतं सत्येन पन्था विततो देवयानः।

येनाक्रमन्त्यृषयो ह्याप्तकामा यत्र तत् सत्यस्य परमं निधानम्॥

P.T.O.

3. अधोलिखितेषु ***प्रश्नद्वयं*** समाधेयम् : 10×2=20

(क) अक्षसूक्तमाश्रित्य कितवस्य जीवनवृत्तं प्रतिपाद्य सूक्तस्यास्य सामाजिकप्रासङ्गिकता आलोच्यताम्।

(ख) अथर्ववेदस्य भूमिसूक्तस्य वैशिष्ट्यमुपस्थाप्यताम्।

(ग) वैदिकवाङ्मये तुमर्थप्रत्ययानां प्रयोगवैचित्र्यं वैशद्येन आलोच्यताम्।

(घ) 'उपनिषद्' शब्दस्य का व्युत्पत्तिः ? मुण्डकोपनिषदि वर्णितं ब्रह्मणः स्वरूपं प्रतिपाद्यताम्।

---